श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनृसिंहराघवदासेन कृतं

# ॥ श्री श्रीनिवासरामानुजमहादेशिकन् (काडन्देति आण्डवन्) मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासरामानुजमहादेशिकन् (काडन्देति आण्डवन्) मङ्गळम् ॥

श्रीवासलक्ष्मणोदीर्णवेदान्तयुगळाशयम्।
श्रीवासगुरूत्तंसं मनवै मुनिपुङ्गवम्॥ 1 ॥

श्रीरङ्गधाम्नः सेवायां नित्यसक्ताय योगिने।
श्रीनिवासलक्ष्मणाख्य गुरवे नित्यमङ्गलम्॥ 2 ॥

श्रीनिवासमुनीशानप्राप्तसार्वज्ञशालिने।
तत्पदाम्भोरुहद्वंद्वचञ्चरीकाय मङ्गलम्॥ 3 ॥

नाथयामुन योगीन्द्रावतारोऽयं महामुनिः।
इति संसेव्यमानाय यतिश्रेष्ठाय मङ्गलम्॥ 4 ॥

गुरुवर्यपदत्राणपरिचर्यारतात्मने।
भरतोपमचारित्ररक्षकायास्तु मङ्गलम्॥ 5 ॥

सदा रङ्गपदध्यात्रे सदा स्मेरमुखाय च।
सदाचार्यकृपालब्धशेमुषीकाय मङ्गलम्॥ 6 ॥

यतीन्द्रमाहानसिकगुरुसेवारतात्मने।
मूर्तीभूतगुरुप्रेम्णे गुरुवर्याय मङ्गलम्॥ 7 ॥

परभक्तिपरज्ञानपरिपूर्णाय योगिने।
पारयित्रे च लोकस्य परतुल्याय मङ्गलम्॥ 8 ॥

सन्यस्तेषणसार्थाय शान्तिनन्दनवासिने।
शासितेन्द्रियवृत्ताय शान्तचित्ताय मङ्गलम्॥ 9॥

उत्कूलचित्तसंक्षोभशमयित्रे कृतात्मने।
द्वयार्थध्यायिने शिष्यधूर्वहायास्तु मङ्गलम्॥ 10॥

सर्वमन्त्रविदे सिद्धमन्त्राय विदितात्मने।
कारणज्ञाननिर्धूतकारणायास्तु मङ्गलम्॥ 11॥

तीरभङ्गापनोदाय नित्यतीरनिवासिने।
निर्णीतपरमार्थाय नित्यमुक्ताय मङ्गलम्॥ 12॥

गुर्वाज्ञया परानन्दस्थेम्ने सेवोपलब्धये।
निर्धूतेतरमन्त्राय नित्यसेव्याय मङ्गलम्॥ 13॥

विशाखस्तम्भभूताय विशतां सत्त्वसद्मनि।
सिंहमासीयमूलर्क्षेऽवतीर्णायास्तु मङ्गलम्॥ 14॥

नृसिंहराघवेणोक्तं छात्रेणाचार्यमङ्गलम्।
पठतां शृण्वतां नित्यं तनोतु भुवि मङ्गलम्॥ 15॥

॥ इति श्री श्रीनिवासरामानुजमहादेशिकन् मङ्गळं समाप्तम्॥